# ।। শ্রী নৃসিংহকৃপাবলোকনপ্রার্থনাস্তুতিঃ ।।

শ্রী কৃষ্ণ উবাচ -

সুলভো ভক্তিযুক্তানাং দুর্দর্শো দুষ্টচেতসাম ।
অনন্যগতিকানাং চ প্রভুঃ ভক্তৈকবত্সলঃ ।। ১ ।।

শনৈশ্চরস্তত্র নৃসিংহদেবস্তুতিং চকারামলচিত্তবৃত্তিঃ ।
প্রণম্য সাষ্টাংগমশেষলোককিরীটনীরাজিতপাদপদ্মম ।। ২ ।।

শনিরুবাচ -

য়ত্পাদপংকজরজঃ পরমাদরেণ
সংসেবিতং সকলকল্মষরাশিনাশম ।
কল্যাণকারণমশেষনিজানুগানাং
স ত্বং নৃসিংহ ময়ি ধেহি কৃপাবলোকম ।। ৩ ।।

সর্বত্র চংচলতয়া স্থিতয়া চ লক্ষ্ম্যা
ব্রহ্মাদিবংদ্যপদয়া স্থিরয়া ন্যসেবি ।
পাদারবিংদয়ুগলম পরমাদরেণ
স ত্বং নৃসিংহ ময়ি ধেহি কৃপাবলোকম ।। ৪ ।।

য়দ্রূপমাগমশিরঃপ্রতিপাদ্যমাদ্য-
মাধ্যাত্মিকাদিপরিতাপহরং বিচিংত্যম ।
য়োগীশ্বরৈরপগতাখিলদোষসংঘৈঃ
স ত্বং নৃসিংহ ময়ি ধেহি কৃপাবলোকম ।। ৫ ।।

প্রহ্লাদভক্তবচসা হরিরাবিরাসীঃ
স্তংভে হিরণ্যকশিপুং য় উদারভাবঃ ।
ঊর্বোর্নিধায় তদুরে নখরৈর্দদার
স ত্বং নৃসিংহ ময়ি ধেহি কৃপাবলোকম ।। ৬ ।।

য়ো নৈজভক্তমনলাংবুধিভূধরোগ্র-
শৃংগপ্রপাতবিষদংতিসরীসৃপেভ্যঃ ।
সর্বাত্মকঃ পরমকারুণিকো ররক্ষ
স ত্বং নৃসিংহ ময়ি ধেহি কৃপাবলোকম ।। ৭ ।।

য়ন্নির্বিকারপররূপবিচিংতনেন
য়োগীশ্বরা বিষয়বীতসমস্তরাগাঃ ।
বিশ্রাংতিমাপুরবিনাশবতীং পরাখ্যাং
স ত্বং নৃসিংহ ময়ি ধেহি কৃপাবলোকম ।। ৮ ।।

য়দ্রূপমুগ্রমরিমর্দনভাবশালি-
সংচিংতনেন সকলাহবভীতিহারি ।
ভূতজ্বরগ্রহসমুদ্ভবভীতিনাশং
স ত্বং নৃসিংহ ময়ি ধেহি কৃপাবলোকম ।। ৯ ।।

য়স্যোত্তমং য়শ উমাপতিপদ্মজন্ম-
শক্রাদিদৈবতসভাসু সমস্তগীতম ।
শ্রুত্যৈব সর্বশমলপ্রশমৈকদক্ষং

স ত্বং নৃসিংহ ময়ি ধেহি কৃপাবলোকম ।। ১০ ।।

শ্রী কৃষ্ণ উবাচ -

এবং শ্রুত্বা স্তুতিং দেবঃ শনিনা কল্পিতাং হরিঃ ।
উবাচ ব্রহ্মবৃংদস্থং শনিং সদ্ভক্তবত্সলঃ ।। ১১ ।।

শ্রী নৃসিংহ উবাচ -

প্রসন্নোহং শনে তুভ্যং বরং বরয় শোভনম ।
য়ং বাংছসি তমেব ত্বং সর্বলোকহিতাবহম ।। ১২ ।।

শ্রী শনৈশ্চর উবাচ -

নৃসিংহ ত্বং ময়ি কৃপাং কুরু দেব দয়ানিধে ।
মদ্বাসরস্তবপ্রীতিকরঃ স্যাদ্দেবতাপতে ।। ১৩ ।।

মত্কৃতং ত্বত্স্তবং য়ে বৈ শৃণ্বংতি চ পঠংতি চ ।
সর্বান কামান পূরয়েথাস্তেষাং ত্বং লোকভাবন ।। ১৪ ।।

শ্ই নৃসিংহ উবাচ -

তথৈবাস্তু শনেঽহং বৈ রক্ষোভুবনমাস্থিতঃ ।
ভক্তকামান পূরয়িষ্যে ত্বং মমৈকং বচঃ শৃণুঃ ।। ১৫ ।।

।। শ্রী নৃসিংহকৃপাবলোকনপ্রার্থনাস্তুতিঃ ।।

ত্বত্কৃতং মত্পরং স্তোত্রং য়ঃ পঠেচ্চ শৃণোতি য়ঃ ।
দ্বাদশাষ্টমজন্মস্থং তদ্ভয়ং মাস্তু তস্য বৈ ।। ১৬ ।।

শনির্নরহরিং দেবং তথেতি প্রত্যুবাচ হ ।
ততঃ পরমসংতুষ্টাঃ জয়েতি মুনয়োঽবদন ।। ১৭ ।।

শ্রী নৃসিংহ উবাচ -

ইত্থং শনৈশ্চরস্যাথ নৃসিংহদেবসংবাদমেতত স্তবনং চ মানবঃ ।
শ্রুণোতি য়ঃ শ্রাবয়তে চ ভক্ত্যা সর্বান্যভীষ্টানি চ বিংদতে ধ্রুবম ।। ১৮ ।।

।। ইতি ভবিষ্যোত্তরপুরাণে রক্ষোভুবনপ্রস্তাবে শনৈশ্চরকৃতা শ্রী নৃসিংহকৃপাবলোকনপ্রার্থনাস্তুতিঃ ।।